# Shri Dandapani or Yaksharaja Ashtakam

# શ્રીદણ્ડપાણ્યષ્ટકમ્ અથવા શ્રીયક્ષરાજાષ્ટકમ્

## Document Information

Text title : Dandapani Ashtakam

File name : daNDapANyaShTakam.itx

Category : deities_misc, aShTaka

Location : doc_deities_misc

Transliterated by : NA

Proofread by : NA

Latest update : May 18, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2021

*sanskritdocuments.org*

# શ્રીદણ્ડપાણ્યષ્ટકમ્ અથવા શ્રીયક્ષરાજાષ્ટકમ્

રત્નગર્ભાઙ્ગજોદ્ભૂત પૂર્ણભદ્રસુશોત્તમ ।
નિર્વિઘ્નં કુરુ મે યક્ષ કાશીવાસં શિવાશ્રયે ॥ ૧॥

ધન્યો યક્ષઃ પૂર્ણભદ્રો ધન્યા કાઞ્ચનકુણ્ડલા ।
યયોર્જઠરપીઠેઽભૂર્દણ્ડપાણે મહામતે ॥ ૨॥

જય યક્ષપતે ધીર! જય પિઙ્ગલલોચન ।
જય પિઙ્ગજટાભાર જય દણ્ડમહાયુધ ॥ ૩॥

અવિમુક્તમહાક્ષેત્રસૂત્રધારોગ્રતાપસ ।
દણ્ડનાયક ભીમાસ્ય જય વિશ્વેશ્વરપ્રિય ॥ ૪॥

સૌમ્યાનાં સૌમ્યવદન ભીષણાનાં ભયાનક ।
ક્ષેત્રપાપધિયાં કાલ મહાકાલ મહાપ્રિય ॥ ૫॥

જય પ્રાણદ યક્ષેન્દ્ર કાશીવાસાન્ન મોક્ષદ ।
મહારત્નસ્ફુરદ્રશ્મિચયચર્ચિતવિગ્રહ ॥ ૬॥

મહાસમ્ભ્રાન્તિજનક મહોદ્ભાન્તિપ્રદાયક ।
અભક્તાનાં ચ ભક્તાનાં સમ્ભ્રાન્ત્યુદ્ભ્રાન્તિનાશક ॥ ૭॥

પ્રાન્તનેપથ્યચતુર જયજ્ઞાનનિધિપ્રદ ।
જયગૌરીપદાબ્જાલે મોક્ષેક્ષણવિચક્ષણ ॥ ૮॥

યક્ષરાજાષ્ટકં પુણ્યમિદં નિત્યં ત્રિકાલતઃ ।
જપામિ મૈત્રાવરુણે વારાણસ્યાપ્તિકારણમ્ ॥ ૯॥

દણ્ડપાણ્યષ્ટકં ધીમાન્ જપન્વિઘ્નૈર્નજાતુચિત્ ।
શ્રદ્ધયા પરિભૂયેત કાશીવાસફલં લભેત્ ॥ ૧૦॥

પ્રાદુર્ભાવં દણ્ડપાણેઃ શ઼ૃણ્વન્ સ્તોત્રમિદં ગૃણન્ ।
વિપત્તિમન્યતઃ પ્રાપ્ય કાશીં જન્માન્તરે લભેત્ ॥ ૧૧॥

ઇતિ શ્રીસ્કન્દપ્રણીતમ્ શ્રીદણ્ડપાણ્યષ્ટકં અથવા
શ્રીયક્ષરાજાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Dandapani or Yaksharaja Ashtakam*
pdf was typeset on December 11, 2021

Please send corrections to *sanskrit@cheerful.com*